# Marya Ashtakam

# मार्यष्टकम्

## Document Information

Text title : Marya Ashtakam

File name : mAryaShTakam.itx

Category : devii, devI, aShTaka, dashamahAvidyA

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 2 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2022

*sanskritdocuments.org*

# मार्यष्टकम्

बद्ध्वा खट्वाङ्गकोटौ कपिलमुरुजटामण्डलं पद्मयोनेः
 कृत्वा दैत्योत्तमाङ्गः राजमुरसि शिरःशेखरं तार्क्ष्यपक्षैः ।
पूर्णं रक्तासवौघैर्यममहिषमहाशृङ्गमादाय पाणौ
 पायाद् वो वन्द्यमानः प्रलयमुदितया शङ्करः कालरात्र्या ॥ १॥

तैलाभ्यक्तैकवेणी त्रपुमयविलसत्कुण्डलाक्रान्तकर्णा
 लौहेनैकेन कृत्वा चरणनिगळनेनात्मनः पादशोभाम् ।
दिग्वासा रासभेन भ्रमति जगदिदं या जपाकर्णपूरा
 मार्जन्यूर्ध्वप्रबद्धध्वजविततभुजा वेत्सि देवि त्वमेव ॥ २॥

संहारस्यान्तकाले नररूधिरवसासम्प्लवे धूमधूम्रे
 दंष्ट्रारौद्रे मुखेऽस्मिस्तव विशति जगद् देवि सर्वं क्षणेन ।
कालो कापालिनी त्वं शवशयनरता योगिनी योगसिद्धा
 वक्राप्यृज्वी च मारी मरणभयहरा त्वं शिवा चण्डखण्डा ॥ ३॥ (चण्डघण्टा)

सङ्ग्रामे हेतिकृत्तैः सरुधिरदशनैः सद्भटानां शिरोभि-
 र्मालामाबध्य नृत्यद्विततभुजलता त्वं श्मशानं प्रविष्टा ।
दृष्टा भूतैः प्रभूतैः पृथुजघनघनाबद्धनागेन्द्रकाञ्ची
 शूलासिव्यग्रहस्ता रुधिरमधुमदाताम्रनेत्रा निशायाम् ॥ ४॥

दिक्कर्युत्कृत्तकृत्तिप्रविततपटिकावेष्टितस्फिक्तटार्धा (दिक्कर्तर्युत्कृत्त)
 सद्यो नारान्त्रनाडीघटितमुखमयीकुण्डलोत्कृष्टगण्डा ।
प्रत्यग्रोद्यद्भटास्यस्त्रुतबहळवसामांसचर्चिक्यकाया (चर्चिष्ककाया/ चर्चिष्कृताया)
 पायात् कापालिनी मां दशनघटघटाच्छोटितप्रेतमांसा ॥ ५॥

कृष्ट्वा पातालमूलात् क्रमकरणरणच्छुष्कशेषाहितन्त्री- (क्रमकषण)
 मासज्य ग्रन्थिबन्धभ्रमवलयनमत्कन्धरां खेटकेन ।
कल्पान्ते भद्रकाली यममहिषमहाशृङ्गकोणप्रहारैः
 पायाद् वो वादयन्ती प्रलयपरिणतब्रह्मकङ्कालवीणाम् ॥ ६॥

विष्वक्संहारकालज्वलदनलशिखाभास्वदुत्तुङ्गशूल-
प्रोतप्रेतान्त्रसूत्रग्रथितशवशिरः स्त्रक्पिनद्धोर्ध्वचूडा ।
सद्यःकृत्तास्रमिश्रामुरुगादितिजत्वक्पटीमादधाना
चामुण्डा चाण्डमौण्डं मटमटिति शिरश्चर्वयन्ती पुनातु ॥ ७॥

भद्रां रौद्रीमसह्यां नरपिशितमुखीं त्वामपूर्वामुदीक्ष्य
भ्रान्ता भीताश्च सद्यस्तरलतरदृशो मातरस्त्वां नमन्ति ।
शक्राद्याः संस्तुवन्ति प्रतिदिनमसकृत् श्यामलाङ्गीमलङ्घ्यां
त्वामेव प्रेतनाथः प्रणमति सभयं भद्रकालि प्रवेपन् ॥ ८॥

वामे कर्णे मृगाङ्कं ग्रहगणखचितं दक्षिणे सूर्यबिम्बं
कण्ठे नक्षत्रहारं पटुविकटजटाजूटके केतुमालाम् ।
स्कन्धे बद्धोरगेन्द्रध्वजनिकषयुतब्रह्मकङ्कालहारं
संहारे धारयन्ती मम हरतु भयं भद्रिका भद्रकाली ॥ ९॥

मारीद्रोहमसूरिकाभयहरं वेतालभूतापहं
चोरव्याघ्रमहोरगादिविषमक्षुद्रज्वरोत्सादनम् ।
श्रीसौभाग्यसुखावहं सुखमुखोदकं सुरक्षाप्रदं (लक्ष्मीसौख्यमुखा)
तन्मार्यष्टकमेतदिष्टफलदं स्तोत्रं त्रिसन्ध्यं जपेत् ॥ १०॥

(This aShTaka consisting of ten shlokas in
praise of Goddess kAlI in her form mArI.)

इति मार्यष्टकं सम्पूर्णम् ।

Proofread by Mohan Chettoor

*Marya Ashtakam*
pdf was typeset on September 4, 2022

Please send corrections to *sanskrit@cheerful.com*